प्रश्नोत्तरकोषाः

प्रश्नबैंक

पूर्वमध्यमा प्रथमखण्डः

विषय कोड : 506

नव्यव्याकरणम्

(लघुसिद्धान्तकौमुदी)

---

1. उचित विकल्पं चित्वा लिखत –

(1) माहेश्वराणि सूत्राणि सन्ति –

(क) पञ्चदशः (ख) षोडशः

(ग) चतुर्दशः (घ) अष्ट

(2) गकारस्योच्चारणस्थानमस्ति –

(क) तालुः (ख) कण्ठः

(ग) मूर्धा (घ) दन्तः

(3) 'हलन्त्यम्' इति सूत्रेण संज्ञा भवति –

(क) इत् (ख) हल्

(ग) उपदेशः (घ) अनुनासिकः

(4) सवर्णसंज्ञा विधायकं सूत्रमस्ति –

(क) समाहारः स्वरितः (ख) सुप्तिङन्तं पदम्

(ग) तुल्यास्य प्रयत्नं सवर्णम् (घ) अदर्शनं लोपः

(5) टकारस्याभ्यान्तरप्रयत्नमस्ति –

(क) स्पृष्टम् (ख) विवृतम्

(ग) ईषत्विवृतम् (घ) ईषत्स्पृष्टम्

(6) इकारस्याभ्यान्तरप्रयत्नमस्ति –

(क) ईषत्विवृतम् (ख) विवृतम्

(ग) स्पृष्टम् (घ) ईषत्स्पृष्टम्

(7) बाह्यप्रयत्नाः सन्ति –

(क) द्वादशः (ख) एकादशः

(ग) पञ्चदशः (घ) पञ्च

(8) प्राणौ स्तः –

(क) एकः (ख) तयः

(ग) षङ् (घ) द्वौ

(9) हलोऽनन्तराः संयोगः इत्यनेन संज्ञा भवति –

(क) हल् (ख) संयोगः

(ग) अनन्तरः (घ) पदम्

(10) पद संज्ञा विधायकं सूत्रमस्ति –

(क) पादः पत् (ख) न पदान्ताट्टोरनाम

(ग) झलां जशोऽन्ते (घ) सुप्तिङन्तं पदम्

(11) यण् सन्धिविधायकं सूत्रमस्ति –

(क) आद्गुणः (ख) इको यणचि

(ग) बृद्धिरेचि (घ) एचोऽयवायावः

(12) 'नायकः' इति पदे सन्धिरस्ति –

(क) गुणः (ख) वृद्धिः

(ग) पूर्वरूपः (घ) अयादिः

(13) 'तवल्कारः' इति सन्धिरस्ति –

(क) गुणः (ख) वृद्धिः

(ग) प्रकृतिभावः (घ) पररूपः

(14) 'प्रष्ठ + ऊहः' संयोगे भवति –

(क) प्रष्ठेहः (ख) प्रष्ठोहः

(ग) प्रष्ठौहः (घ) प्रष्ठूहः

(15) उपसर्गाः सन्ति –

(क) पञ्च (ख) द्वादशः

(ग) विंशतिः (घ) द्वाविंशतिः

(16) अकः सवर्णेऽचि परे पूर्वपरमोः स्थाने सन्धिर्भवति –

(क) दीर्घः (ख) गुणः

(ग) सुलोपः (घ) यण्

(17) पूर्वरूप सन्धि विधायकं सूत्रमस्ति –

(क) एङिपररूपम् (ख) एङः पदान्तादति

(ग) सर्वत्र विभाषा गोः (घ) ओमाङोश्च

(18) सच्चित् इत्यत्र सन्धिरस्ति –

(क) ष्टुत्वम् (ख) कुत्वम्

(ग) श्चुत्वम् (घ) जश्त्वम्

(19) 'नश्च' इति सूत्रेणागमः भवति –

(क) कुक् (ख) धुट्

(ग) सुट् (घ) नुट्

(20) 'रेकस्य रेके परे लोपं' करोति।

(क) हशि च (ख) वा शरि

(ग) विसर्जनीयस्य सः (घ) रोरि

(21) सुबन्ताः सन्ति –

(क) बिंशतिः (ख) एकबिंशतिः

(ग) नव (घ) द्वादशः

(22) 'अमि पूर्वः' इति सूत्रस्योदाहरणमस्ति –

(क) रामः (ख) रामौ

(ग) रामाः (घ) रामम्

(23) 'सर्वेषाम्' इत्यस्य विभक्तिरास्ति –

(क) पञ्चमी (ख) षष्ठी

(ग) चतुर्थी (घ) तृतीया

(24) 'सुऽनपुंसकस्य' इति सूत्रेण भवति –

(क) भ संज्ञा (ख) पद संज्ञा

(ग) सर्वनाम संज्ञा (घ) सर्वनामस्थान संज्ञा

(25) पति शब्दस्य सप्तम्मेकवचनं रूपमस्ति –

(क) पत्ये (ख) पती

(ग) पत्यौ (घ) पत्युः

(26) 'ओः सुपि' इति सूत्रेण भवति –

(क) गुणः (ख) यण्

(ग) बृद्धिः (घ) लोपः

(27) 'ङिति ह्रस्वश्च' इति सूत्रेण भवति –

(क) नदी संज्ञा (ख) घि संज्ञा

(ग) पद संज्ञा (घ) सर्वनाम संज्ञा

(28) गो शब्दस्य द्वितीयेकवचनं रूपमस्ति –

(क) गोम् (ख) गाम्

(ग) गौम् (घ) गावम्

(29) ज्ञान शब्दस्य प्रथमाविभक्तेः बहुवचनं रूपमस्ति –

(क) ज्ञानानि (ख) ज्ञानम्

(ग) ज्ञाने (घ) ज्ञानाम

(30) विभक्तयः सन्ति –

(क) सप्त (ख) अष्ट

(ग) नव (घ) त्रयः

2. रिक्तस्थानानि पूरयत –

(1) रकारस्योच्चारणस्थानं ..... वर्तते।

(2) वर्गाणां प्रथमतृतीयपञ्चमाः चाल्पप्राणाः भवन्ति।

(3) भूवादयो .....।

(4) इकोऽसवर्णे ..... ह्रस्वश्च।

(5) अनुस्वारस्य ..... परसवर्णः।

(6) अर्थवदधातुरप्रत्ययः .....।

(7) प्रत्ययलोपे ..... लक्षणम्।

(8) ऋतो ..... सर्वनामस्थानयोः।

(9) 'ङिति ह्रस्वश्च' इत्यनेन ..... संज्ञा भवति।

(10) तृतीयादिषु भाषितपुंस्कं ..... गालवस्य।

(11) त्रि-चतुरोः ..... तिसृचतसृ।

(12) ऋवर्णान्नस्य ..... वाच्यम्।

(13) 'अचोञ्णिति' इत्यनेन ..... भवति।

(14) 'तल्लयः' इत्यत्र ..... सन्धिरस्ति।

(15) 'दूराद् धूते च' इत्यनेन दूरात्सम्बोधने वाक्यस्य हेः ..... वा स्यात्।

(16) लघुसिद्धान्तकौमुद्या रचयिता ..... वर्तते।

3. सत्य कथनानां समक्षे 'आम्' असत्य कथनानां समक्षे 'न' इति लिखत –

(1) एचामपि द्वादश तेषां दीर्घाभावात्।

(2) कादयोमावसानाः स्पर्शाः।

(3) लाकृतिः इत्यस्मिन् पदे गुण सन्धिरस्ति।

(4) नाव्यम् इत्यस्मिन् पदे यण सन्धिर्भवति।

(5) सपादसप्ताध्यायीं प्रति त्रिपादिसूत्राणि सिद्धाः भवन्ति।

(6) 'गङ्गे अमू' इति पदे प्रकृति भावः सन्धिरस्ति।

(7) 'झरो झरि सवर्णे' इति सूत्रेण हारो लोपो न भवति।

(8) 'हलि सर्वेषाम्' इति सूत्रेण यकारस्य लोपः भवति।

(9) 'रामाय' इति प्रयोगे 'ङेर्यः' इति सूत्रेण यादेशः भवति।

(10) निर्जरसा प्रथमाविभक्तेः रूपमस्ति।

(11) 'हरिणा' षष्ठी विभक्तेः रूपमस्ति।

(12) कति शब्दो नित्यं बहुवचनान्तः।

(13) क्रोष्टुः चतुर्थ्येकवचनस्य रूपमस्ति।

(14) रमया तृतीमैकवचनस्य रूपमस्ति।

(15) 'अचि र ऋतः' इति सूत्रेण ऋकारस्य रेकादेशः भवति।

(16) 'स्वयोर्नपुंसकात्' इत्यनेन स्वयोर्लुक न भवति।

4. युग्ममेलनं कुरुत –

(1)	(क)	अष्टाध्यायी	(क)	गुणसन्धिः
	(ख)	पठ्	(ख)	पाणिनिः
	(ग)	धात्त्रंशः	(ग)	धातुः
	(घ)	परा	(घ)	यणसन्धिः
	(ङ)	उपेन्द्रः	(ङ)	उपसर्गः
(2)	(क)	माहेश्वरसूत्राणि	(क)	निषेधसूत्रम्
	(ख)	वृद्धिरादैच	(ख)	परसवर्णः
	(ग)	तोर्लि	(ग)	तृतीया
	(घ)	नादिचि	(घ)	वृद्धिसंज्ञा
	(ङ)	अनेन	(ङ)	चतुर्दश

(3)	(क)	देवा इह	(क)	चतुर्थी
	(ख)	सर्वस्यै	(ख)	लोपः शाकल्यस्य
	(ग)	मनोरथः	(ग)	छत्वं
	(घ)	शश्छोऽटि	(घ)	प्रथमा
	(ङ)	सम्बोधने	(ङ)	विसर्गसंधिः
(4)	(क)	विश्वपाम्	(क)	अम्बार्थनद्योर्ह्रस्वः
	(ख)	सखा	(ख)	षष्ठी
	(ग)	हे बहुश्रेमसि	(ग)	चतुर्थी
	(घ)	तिस्रः	(घ)	प्रथमा
	(ङ)	मत्यै	(ङ)	स्त्रीलिङ्गम्

5. एकपदेन उत्तरं लिखत –

(1) कति प्रत्याहाराः सन्ति ?

(2) प्रत्याहारविधायकं सूत्रं किम् ?

(3) शल् प्रत्याहारे कति वर्णाः सन्ति ?

(4) यण्संज्ञाविधायकं सूत्रं लिखत।

(5) अयादिसंधिविधायकं सूत्रं लिखत।

(6) 'गङ्गोदकम्' इति पदस्य विच्छेदं कुरुत ?

(7) कति उपसर्गाः सन्ति ?

(8) मध्वरिः इत्यस्य सन्धिं कुरुत ?

(9) 'प्राच्छति' इति प्रयोगे केन सूत्रेण वृद्धिर्भवति ?

(10) 'रामश्चिनोति' इति सन्धेः नाम लिखत।

(11) 'वागीशः' इत्यत्र जश्त्वं केन सूत्रेण भवति ?

(12) 'वाग्घरिः' इति विच्छेदं कुरुत ?

(13) 'षट्त्सन्तः' इति क आगमः भवति ?

(14) राम शब्दस्य तृतीयैकवचने किं रूपम् ?

(15) 'एषको रूद्रः' इत्यत्र सन्धेः नाम लिखत।

(16) 'बहुवचने झल्येत' इति सूत्रेणादेशः को भवति ?

(17) 'डति च' इति सूत्रेण का संज्ञा भवति ?

(18) 'राः' इत्यत्र मूलशब्दः कः ?

(19) मति शब्दस्य सप्तम्येकवचनं रूपं लिखत।

(20) 'दध्ना' इति पदे मूलशब्दः लिखत।

6. एकवाक्येन उत्तरत –

(1) 'वारि' शब्दस्य प्रथमाविभक्तेः रूपं लिखत।

(2) 'नपुंसकाच्च' इति सूत्रस्य वृत्तिं लिखत।

(3) 'स्त्री' शब्दस्य द्वितीयाविभक्तेः रूपं लिखत।

(4) चतुरशब्दस्य स्त्रीलिङ्गे सम्पूर्णं रूपं लिखत।

(5) 'सर्वा' शब्दस्य षष्ठीविभक्तेः रूपं लिखत।

(6) 'प्रधी' शब्दे यण् केन सूत्रेण भवति ?

(7) 'पपी' शब्दस्य सप्तमीविभक्तेः रूपं लिखत।

(8) 'सर्वनामस्थाने चाऽसम्बुद्धौ' इति सूत्रस्य कार्यं लिखत।

(9) 'हे हरे' इति पदे गुणः केन सूत्रेण भवति ?

(10) सर्वनामस्थानसंज्ञाविधायकं सूत्रं लिखत।

(11) 'शिवोऽर्च्यः' इति पूर्वरूपं केन सूत्रेण भवति ?

(12) 'खरवसानयोर्विसर्जनीयः' इति सूत्रस्य कार्यं लिखत।

(13) 'एचोऽयवाभावः' इति सूत्रस्य सन्धिविच्छेदं कुरुत ?

(14) 'गव्यूतिः' इति विग्रहं कृत्वा सन्धेः नाम लिखत।

(15) प्रथमतृतीयपञ्चमवर्गाणां प्राणं कः ?

(16) लघुसिद्धान्तकौमुद्याः रचयिता कः ?

(17) 'अनडुह्' शब्दस्य प्रथमा विभक्तौ आमागमः केन सूत्रेण भवति ?

(18) इदम् शब्दस्य पुल्लिङ्गे प्रथमाविभक्तेः रूपं लिखत।

(19) 'पञ्चानाम्' इति दीर्घः केन सूत्रेण भवति ?

(20) 'तदोः सः सावनन्त्योः' सूत्रस्यार्थो लेखनीयम्।

(21) युष्मद् शब्दस्य द्वितीयाविभक्तेः रूपं लिखत।

(22) अदस् शब्दस्य पुल्लिङ्गे तृतीयैकवचनं रूपं लिखत।

(23) गिर् शब्दस्य प्रथमाविभक्तेः त्रिषुवचनेषु रूपं लिखत।

(24) भू धातोः लट्लकार प्रथमपुरुषस्य त्रिवचनेषु रूपं लिखत।

(25) व्रज् धातोः लिट्लकारोत्तमपुरुषस्य त्रिवचनेषु रूपं लिखत।

(26) गम् धातोः लुङ्लकारप्रथमपुरुषस्येकवचनं रूपं लिखत।

(27) कस्मिन्नर्थे धातोर्लङ् लकारः प्रयुज्यते ?

(28) 'उवाह' इति धातुलकारवचनानि च लिखत।

(29) एध् धातोः लट्लकारप्रथमपुरुष त्रिवचनेषु रूपं लिखत।

(30) 'चङि' इति सूत्रेण क आदेशः भवति।

7. युग्ममेलनं कुरुत –

(क) माम्	(क) विद्वस्
(ख) विद्वान्	(ख) क्षि
(ग) भूतार्थानद्यतने	(ग) अस्मद्
(घ) चिक्षाय	(घ) सक्ष्मलोपः
(ङ) इट ईटि	(ङ) लङ्

8. सत्यं-असत्यं वा कुरुत –

(1) 'सुद्यौः' प्रथमाविभक्तेः रूपमस्ति।

(2) 'इदमो मः' इति सूत्रेण दस्य स्थाने मकारः न भवति।

(3) 'इग्यणः सम्प्रसारणम्' इति सूत्रेण गुण संज्ञा भवति।

(4) अस्मद् इति शब्दे पञ्चम्येकवचने मत् रूपमस्ति।

(5) 'रि च' इति सूत्रेण सकारलोपः भवति।

(6) पा धातोः स्थाने पिबादेशः भवति।

(7) 'कुहोश्चुः' इति सूत्रेण चवर्गस्य कवर्गः भवति।

(8) 'झलो झलि' इति सूत्रेण सकार लोपः भवति।

(9) 'श्रोता' लुटलकारस्य रूपमस्ति।

(10) भज धातुः सेवार्थे नास्ति।

9. उचित विकल्पं चित्वा लिखत –

(1) 'भक्ष्यति' इति पदे मूलधातुरस्ति –

(*i*) भज् (*ii*) भक्ष्

(*iii*) भक्ष्य (*iv*) भा

(2) 'गमेरिट् परस्मैपदेषु' इत्यनेन भवति –

(*i*) परस्मैपदसंज्ञा (*ii*) गमसंज्ञा

(*iii*) इटागम् (*iv*) लोपः

(3) 'भूयात्' इत्यत्र लकारोऽस्ति –

(*i*) लट् (*ii*) विधिलिङ्

(*iii*) लुङ् (*iv*) आशिषिलिङ्

(4) अप् शब्दो नित्यं वचनान्तोऽस्ति –

(*i*) एक (*ii*) द्वि

(*iii*) बहु (*iv*) सर्व

(5) राजन् शब्दस्य प्रथमा बहुवचनं रूपमस्ति –

(*i*) राजा (*ii*) राजानौ

(*iii*) राजानः (*iv*) राज्ञः

10. एकपदेन उत्तरत –

(1) सम्प्रसारणसंज्ञासूत्रं लिखत।

(2) अभ्यस्तसंज्ञासूत्रं लिखत।

(3) अव्ययसंज्ञासूत्रं लिखन्तु।

(4) वर्तमानकाले कः लकारः भवति ?

(5) एध् धातोः लङ्लकार प्रथमपुरुष द्विवचनं रूपं लिखत।

(6) गम् धातोः लृट्लकारोत्तमपुरुषैकवचनं रूपं लिखत।

(7) 'स्वनडुह्' शब्दे नपुंसकलिङ्गे प्रथमाविभक्ति बहुवचनं रूपं लिखत।

(8) 'आशीर्भ्याम्' इति पदे मूलशब्दः कः ?

(9) महत् शब्दे सम्बोधने कः रूपम् ?

(10) युष्माकम् कस्मिन् विभक्तेः रूपमस्ति ?

11. सूत्राणां व्याख्या –

(1) स्तोः श्चुना श्चुः

(2) पूर्वत्रासिद्धम्

(3) आदिरन्त्येन सहेता

(4) ङमो ह्रस्वादचि ङमुण् नित्यम्

(5) अर्थवदधातुरप्रत्ययः प्रतिपदिकम्

(6) अट्कुप्वाङ्नुम्व्यवायेऽपि

(7) सर्वनामस्थाने चाऽसम्बुद्धौ

(8) ङिति ह्रस्वश्च

(9) नपुंसकस्य झलचः

(10) न संयोगाद्वमन्तात्

(11) उगिदचां सर्वनामस्थानेऽधातोः

(12) अनिदितां हल उपधायाः क्ङिति

(13) सान्तमहतः संयोगस्य

(14) लः कर्मणि च भावे चाऽकर्मकेभ्यः

(15) सार्वधातुकमपित्।

12. अधोलिखितसूत्राणां पूर्णरूपं लिखत –

(1) गमहन ..... क्ङित्यनङि।

(2) पाघ्राध्मा ..... धौशीमसीदाः।

(3) नेर्गदनदपत ..... चिनोतिदेग्धिषु च।

(4) तिप्तसप्ति ..... महिङ्।

(5) अप्तृन्तृच् ..... प्रशास्तॄणाम्।

(6) स्वौजसमौट् ..... ङ्मोस्सुप्।

(7) तृतीयादिषु ..... गालवस्य।

(8) व्रश्चभ्रस्ज ..... छशांषः।

(9) परस्मैपदानां ..... णल्वमाः।

(10) विधिनिमन्त्रण ..... प्रार्थनेषु लिङ्।

13. अधोलिखित प्रश्नानामुत्तराणि लिखन्तु –

(1) कति लकाराः, तेषां नामानि लिखत।

(2) कति, उपसर्गाः के च ते ?

(3) कति सुबन्तप्रत्ययाः तेषां नामानि लिखत।

(4) अव्ययस्य लक्षणं लिखत।

(5) कति तिङन्त प्रत्ययाः, के च ते ?

(6) माहेश्रसूत्राणि लिखत।

14. भ्वादिगणीय धातूनां प्रयोगसिद्धमः –

(1) भवन्ति

(2) अभवत्

(3) आनर्चतुः

(4) गमिष्यति

(5) एधन्ते

(6) पपिथ, पापथ।

उत्तराणि

पूर्वमध्यमा प्रथमखण्डः

विषय कोड : 506

नव्यव्याकरणम्

(लघुसिद्धान्तकौमुदी)

---

1. उत्तरम् –

(1) (ग) चतुर्दशः

(2) (ख) कण्ठः

(3) (क) इत्

(4) (ग) तुल्यास्य प्रयत्नं सवर्णम्

(5) (क) स्पृष्टम्

(6) (ख) विवृतम्

(7) (ख) एकादशः

(8) (घ) द्वौ

(9) (ख) संयोगः

(10) (घ) सुप्तिङन्तं पदम्

(11) (ख) इको यणचि

(12) (घ) अयादिः

(13) (क) गुणः

(14) (ग) प्रष्ठौहः

(15) (घ) द्वाविंशतिः

(16) (क) दीर्घः

(17) (ख) एङः पदान्तादति

(18) (ग) श्चुत्वम्

(19) (ख) धुट्

(20) (घ) रोरि

(21) (ख) एकबिंशतिः

(22) (घ) रामम्

(23) (ख) षष्ठी

(24) (घ) सर्वनामस्थान संज्ञा

(25) (ग) पत्यौ

(26) (ख) यण्

(27) (क) नदी संज्ञा

(28) (ख) गाम्

(29) (क) ज्ञानानि

(30) (क) सप्त

2. उत्तरम् –

(1) मूर्धा

(2) यणः

(3) धातवः

(4) शाकल्यस्य

(5) यथि

(6) प्रतिपदिकम्

(7) प्रत्यय

(8) ङि

(9) नदी

(10) पुंवद्

(11) स्त्रियां

(12) णत्वं

(13) वृद्धिः

(14) परसवर्णः

(15) प्लुतः

(16) श्रीवरदराजाचार्यः

3. उत्तरम् –

(1) न

(2) आम्

(3) न

(4) न

(5) न

(6) आम्

(7) न

(8) आम्

(9) आम्

(10) न

(11) न

(12) आम्

(13) न

(14) आम्

(15) आम्

(16) न

4. उत्तरम् –

(1) (क) क + ख

(ख) ख + ग

(ग) ग + घ

(घ) घ + ङ

(ङ) ङ + क

(2) (क) क + ङ

(ख) ख + घ

(ग) ग + ख

(घ) घ + क

(ङ) ङ + ग

(3) (क) क + ख

(ख) ख + क

(ग) ग + ङ

(घ) घ + ग

(ङ) ङ + घ

(4) (क) क + ख

(ख) ख + घ

(ग) ग + क

(घ) घ + ङ

(ङ) ङ + ग

5. उत्तरम् –

(1) द्विचत्वारिंशत्

(2) आदिरन्त्येन सहेता

(3) चत्वारः (श, ष, स, ह)

(4) इको यणचि

(5) एचोऽयवायावः

(6) गङ्गा + उदकम् (गुणसंधि)

(7) द्वाविंशतिः

(8) मधु + अरिः

(9) उपसर्गादृति धातौ

(10) श्चुत्व (हल/व्यञ्जनसन्धिः)

(11) झलां जशोऽन्ते

(12) वाक् (ग्) + हरिः

(13) धुट्

(14) रामेण

(15) विसर्गसन्धिः

(16) एकारः

(17) षट्

(18) रै

(19) मत्याम्, मतौ

(20) दधि

6. उत्तरम् –

(1) वारि, वारिणी, वारीणि।

(2) क्लीबात्परस्मौङ शी स्यात्। भसंज्ञायाम्।

(3) स्त्रियम्, स्त्रीम्, स्त्रियौ, स्त्रियः, स्त्रीः।

(4) चतस्रः, चतस्रः, चतसृभिः, चतसृभ्यः, चतसृभ्यः, चतसृणाम्, चतसृषु।

(5) सर्वस्याः, सर्वयोः, सर्वासाम्।

(6) एरनेकाचोऽसंयोगपूर्वस्य।

(7) पपी, पप्योः, पपीषु।

(8) उपधायाः दीर्घः।

(9) ह्रस्वस्य गुणः।

(10) सुऽनपुंसकस्य।

(11) एडः पदान्तादति।

(12) विसर्गः।

(13) एचः + अम् + अव् + आम् + आवः।

(14) गो + यूतिः, अयादि सन्धिः।

(15) अल्पप्राणः।

(16) श्रीवरदराजाचार्यः।

(17) चतुरनडुहोरामुदात्तः।

(18) अयम्, इमौ, इमे।

(19) नोपधायाः।

(20) त्यदादीनां तकारदकारयोरनन्त्ययोः सः स्यात्सौ।

(21) त्वाम्, युवाम्, युष्मान्।

(22) अमुना।

(23) गीः, गिरौ, गिरः।

(24) भवति, भवतः, भवन्ति।

(25) वव्राज, वव्रज, वव्रजिव, वव्रजिम।

(26) अगमत्, अगमताम्, अगमन्।

(27) अनद्यतने लङ्-अनद्यतनभूतार्थवृतेर्धातोर्लङ् स्यात्।

(28) वह्-प्रापणे धातुः लिट्लकारे प्रथमपुरुषैकवचनेरूपमस्ति।

(29) एधते, एधेते, एधन्ते।

(30) द्वित्वादेशः।

7. उत्तरम् –

(क) क + ग

(ख) ख + क

(ग) ग + ङ

(घ) घ + ख

(ङ) ङ + घ

8. उत्तरम् –

(1) सत्यं

(2) असत्यं

(3) असत्यं

(4) सत्यं

(5) सत्यं

(6) सत्यं

(7) असत्यं

(8) सत्यं

(9) सत्यं

(10) असत्यं

9. उत्तरम् –

(1) (*i*) भज्

(2) (*iii*) इटागम्

(3) (*iv*) आशिषिलिङ्

(4) (*iii*) बहु

(5) (*iii*) राजानः

10. उत्तरम् –

(1) इग्यणः सम्प्रशारणम्

(2) जक्षित्यादयः षट्

(3) स्वरादिनिपातमव्यमम्

(4) लट्लकारः

(5) ऐधेताम्

(6) गमिष्यामि

(7) स्वनङ्वांहि

(8) आशिष्

(9) हे महन्

(10) षष्ठी विभक्ति

11. उत्तरम् –

(1) सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः।

(2) सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा त्रिपायामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्।

(3) अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात्।

(4) ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याऽचो नित्यं ङमुडागमः स्यात्।

(5) धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वाऽर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञः स्यात्।

(6) अट् कवर्गः पवर्ग आङ् नुम् एतैर्व्यस्तैर्यथा सम्भवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात्समानपदे।

(7) नान्तस्योपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने।

(8) इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वौ च इवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति।

(9) झलन्तस्याऽजन्तस्य च क्लीबस्य नुम् स्यात् सर्वनामस्थाने।

(10) वकारमकारान्तसंयोगात्परस्योऽनोऽकारस्य लोपो न स्यात्।

(11) अधातोरूगितो वलोपिनोऽञ्चतेश्च नुमागमः स्यात्सर्वनामस्थाने परे।

(12) हलन्तानामनिदितामङ्गानामुपधाया नस्य लोपः स्यात् किति ङिति च।

(13) सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने।

(14) लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो भावे कर्तरि च।

(15) अपित्सार्वधातुकं ङित्वत् स्यात्।

12. उत्तरम् –

(1) जनखनघसां लोपः।

(2) स्थाम्नादाण्दृश्यर्तिसर्ति शदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छ।

(3) पदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यति।

(4) सिप्थस्थमिब्वस्मस्ताऽऽताञ्झथासाथान्ध्वमिङ्वहि।

(5) स्वसृनत्तृनेष्टृत्वष्टृक्षतृहोतृपोतृ।

(6) छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्।

(7) भाषितपुंस्कं पुंवद्।

(8) सृजमृजयजराजभ्राजच्।

(9) णलतुसुस्थलथुस।

(10) आमन्त्रणाधीष्टसम्प्रश्न।

13. उत्तरम् –

(1) दश लकाराः सन्ति।

नामानि – लट्, लिट्, लुट्, लृट्, लेट्, लोट, लङ्, लिङ्, लुङ्, लृङ्।

(2) प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप द्वाविंशतिरूपसर्गाः सन्ति।

(3) सु, औ, जस्, अम्, औट्, शस्, टा, भ्याम्, भिस्, ङे, भ्याम्, भ्यस्, ङसि, भ्याम्, भ्यस्, ङस्, ओस्, आम्, ङि, ओस्, सुप् एते एकविंशतिः प्रत्ययाः सन्ति।

(4) सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।

वचनेषु च सर्वेषु यन्न व्येति दतव्ययम्॥

(5) तिप्, तस्, झि, सिप्, थस्, थ, मिप्, वस्, मस्, त, आताम्, झ, भास्, आथाम्, ध्वम्, इङ्, वहिङ्, महिङ्, एतेऽष्टादश स्युः।

(6) (1) अइउण्, (2) ऋलृक्, (3) एओङ्, (4) ऐऔच, (5) हमवरट्, (6) लण्, (7) ञमङणनम्, (8) झभञ्, (9) घढधष्, (10) जबगडदश, (11) खकछठथचटतव, (12) कपय, (13) शषसर्, (14) हल एते चतुर्दश माहेश्वरसूत्राणि सन्ति।

14. उत्तरम् –

(1) भू धातोः "वर्तमाने लट्" इत्यनेन लट्यनुबन्ध लोपे तिप्तस्झिसिप्थस्थमिब्वस्मस्तातां-झथासाथांध्वमिङ्वहिमहिङ् इति सूत्रेण लस्य स्थाने झि आदेश, भू + झि, इति जाते, "छो ऽन्तः" इत्यनेन स्तस्य अन्तादेशः भू + अन्ति, इति जाते, तिङ्शित्सार्वधातुकम् इत्यनेन सार्वधातुक संज्ञा "सार्वधातुकार्धधातुकयोः" इत्यनेन गुणे कर्तरि शप् इति सूत्रेण शप्यनुबन्ध लोपे शित्त्वात् सार्वधातुकसंज्ञायां भो + अ + अन्ति "एचोऽपवायावः" इत्यनेन अवादेशे "अतो गुणे" इति पररूपे भवन्ति सिद्धमिति।

(2) "भू धातोः अनद्यतने लङ्" इत्यनेन लङ्मनुबन्धलोपे तिप्तस्झिसिपथस्थ इत्यादिना सूत्रेण तिप्यनुबन्ध लोपे लुङ्लङ्लृङक्ष्वडुदात्तः इत्यनेन अट्यनुबन्धलोपे अ + भू + ति इति स्थिते

"तिङ्शित्सार्वधातुकम्" इत्यनेन सर्वाधातुकसंज्ञायां कर्तरि शप् इति शप्यनुबन्ध लोपे शित्वात् सार्वधातुकसंज्ञायां "सार्वधातुकार्धधातुकयो" इति गुणे अ + भो + अ + ति इति जाते "एचोऽयवायाव:" इति सूत्रेण अवादेश: "इतश्च" इति इकार लोपे अभवत् सिद्धमिति।

(3) अर्च् धातो: "परोक्षे लिट्" इति सूत्रेण लिट्यनुबन्धलोपे "तिप्तस्सिइत्यादिना" लस्य स्थाने तस् "परस्मैपदानां णलतुसुस्थलथुसणल्वमा:" इति सूत्रेण-अतुसादेश "लिटि धातोरनच्यासस्य" इत्यनेन द्वित्वे, अर्च + अर्च + अतुस् इति जाते. "पूवोऽभ्यास:" इति सूत्रेण अभ्याससंज्ञायां "हलादिशेष:" इति लोप: सवर्णदीर्घे प्राप्ते तं प्रबाध्य "अतो गुणे" इति पररूपे प्राप्ते "अत आदे:" इति सूत्रेण अभ्यासस्य दीर्घे आ + अर्च + अतुस् "तस्मान्नुड्द्विहल:" इत्यनेन नुडागमेऽनुबन्धलोपे, वर्ण सम्मेलने रूत्व विसर्गे आनर्चतु: सिद्धमिति।

(4) "गम्लृ-गतौ धातो: लृट् शेषे च" इति लृट्यनुबन्ध लोपे "तिपतसृझि-इत्यादिना तिपादेश: शप् प्राप्ते तं प्रबाध्य स्यतासी लृलुटो:" इति स्यादेशे "आर्धधातुकं शेष:" इति आर्ध धातुकसंज्ञायां "आर्धधातुकस्येऽवलादे:" इति सूत्रेण इडागमे, सस्म मूर्धन्यादेशे वर्ण सम्मेलने गमिष्यतीति सिद्धम्।

(5) एध् धातो: "वर्तमाने लट्" इति लट्मनुबन्धलोपे तिप्तस्झि-इत्यादिना आत्मनेपदी त प्रत्यये "तिङ्शित्सार्वधातुकम्" इत्यनेन सार्वधातुकसंज्ञायाम् "कर्तरिशप्" इत्यनेन शप्यनुबन्ध लोपे "शित्वात् सार्वधातुकसंज्ञायाम् टितात्मनेपदानां टेरे" इत्यनेन एत्वादेशे वर्ण सम्मेलने एधते सिद्धमिति।

(6) पा धातो: "परोक्षेलिट्" इति सूत्रेण लिट्यनुबन्धलोपे "तिप्तस्झि ....." इत्यादिना सूत्रेण सिपि प्रत्यये "परस्मैपदानां णलतुसुस्थलथुसणल्वमा:" इति सूत्रेण थल्यनुबन्धलोपे, पा + थ इति स्थिते "लिटि धातोरनभ्यासस्य" इत्यनेन द्वित्वे "पा + पा + थ" इति जाते "पूर्वोभ्यास:" इति-अभ्याससंज्ञायां "ह्रस्व:" इति सूत्रेण ह्रस्वे प + पा + थ इति जाते "लिट् च" इति सूत्रेणार्धधातुकसंज्ञायां आर्धधातुकत्वात् "आर्धधातुकस्मेड् वलादे:" इति इडागमे प्राप्ते "एकाच उपदेशेऽनुदात्तात्" इति सूत्रेण निषेधे "पपाथ" इति सिद्धम्। पक्षे "ऋतो भारद्वाजस्य" इत्यनेन भारद्वाजमते इटि अनुबन्ध लोपे वर्ण सम्मेलने पपिथ सिद्धमिति।